Roll No. ....................

# 522

522-02-72-220

## कक्षा 9 वीं परीक्षा, 2019–20

## [7205-B]

# SANSKRIT (General)

## संस्कृत सामान्यम्

[Total No. of Questions: 19] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 100]

***निर्देश –***

*(1) सर्वे प्रश्नाः करणीयाः।*

*(2) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

प्र.1 उचितं विकल्पं चित्वा लिखत – (5×1=5)

(i) देवौदार्यम् इत्यस्मिन्पदे सन्धिः अस्ति –

(अ) गुण सन्धिः (ब) वृद्धि सन्धिः

(स) दीर्घ सन्धिः (द) पूर्व रूप सन्धिः

(ii) राज + ऋषि........................भवति।

(अ) राजऋषिः (ब) राजऋषौ

(स) राजर्षिः (द) राजानां ऋषिः

(iii) महोत्सवः एतस्य पदस्य सन्धिविच्छेदः भवति –

(अ) महो + उत्सवः (ब) महा + उत्सवः

(स) महान् + उत्सवः (द) महः + उत्सवः

(iv) दीर्घ–सन्धेः उदाहरणः अस्ति –

(अ) कपीशः (ब) गणेशः

(स) नरेन्द्रः (द) अत्रैकः

(v) अधोलिखितेषु अव्ययम् अस्ति –

(अ) यत्र (ब) रमेशः

(स) रामः (द) मोहनः



https://www.evidyarthi.in/

प्र.2. उचितं विकल्पं चित्वा लिखत – (5X1=5)

(i) तत्पुरुष–समासस्य उदाहरणम् अस्ति –

(अ) पितरौ (ब) पीताम्बरः

(स) दीनदानम् (द) चन्द्रशेखरः

(ii) बाणहतः इत्यस्य पदस्य समास विग्रहः भवति –

(अ) बाणात् हतः (ब) बाणं हतः

(स) बाणेन हतः (द) बाणस्य हतः

(iii) महापुरुषः इत्यस्मिन् पदे समासः अस्ति –

(अ) द्वन्द्वः समासः (ब) कर्मधारय समासः

(स) अव्ययीभाव समासः (द) बहुव्रीहिः समासः

(iv) अधोलिखितेषु पदेषु उपसर्ग युक्तं पदं चित्वा लिखत –

(अ) अनुभवति (ब) अनलः

(स) अनिलः (द) अग्निः

(v) अवतारः इत्यस्मिन् पदे उपसर्गः अस्ति –

(अ) अप (ब) सम

(स) अनु (द) अव

प्र.3 उचितं विकल्पं चित्वा लिखत – (5X1=5)

(i) 'त्वं' इत्यस्य पदस्य वचनम् अस्ति –

(अ) द्विवचनम् (ब) एकवचनम्

(स) बहुवचनम् (द) कोऽपिनास्ति

(ii) सेवते इत्यस्मिन् पदे पुरुषः अस्ति –

(अ) प्रथम पुरुषः (ब) मध्यम पुरुषः

(स) उत्तम पुरुषः (द) महापुरुषः

(iii) 'गच्छेत्' इत्यस्मिन् पदे धातुः अस्ति –

(अ) सेव् (ब) हस्

(स) गम् (द) पठ्

(iv) 'भवामि' इत्यस्मिन् पदे लकारः अस्ति –

(अ) लट् लकारः (ब) लङ् लकारः

(स) लोट लकारः (द) लृट् लकारः

(v) 'अद्य रविवासरः अस्ति' वाक्ये अव्ययम् अस्ति –

(अ) अद्य (ब) सोम

(स) वासरः (द) अस्ति



https://www.evidyarthi.in/

प्र.4 उचितं विकल्पं चित्वा लिखत – (5×1=5)

(i) 'सेवमानः' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) शतृ (ब) शानच्

(स) ल्यप् (द) क्त्वा

(ii) 'क्त्वा' प्रत्ययस्य उदाहरणम् अस्ति –

(अ) पठितः (ब) हसितः

(स) गतवान् (द) क्रीडित्वा

(iii) पा + तुमुन् ......................भवति।

(अ) भूत्वा (ब) पीत्वा

(स) पातुम् (द) पतितुम्

(iv) 'सः ध्यानं कृत्वा पाठं पठति' वाक्ये कृदन्त–युक्त–पदम् अस्ति –

(अ) पाठं (ब) ध्यानं

(स) सः (द) कृत्वा

(v) योगः............................कौशलम्।

(अ) धर्मसु (ब) अर्थेषु

(स) कर्मसु (द) कामेषु

प्र.5 प्रदत्तशब्दैः रिक्तस्थानानांपूर्तिः करणीया – (5×1=5)

(i) सुकर्मा महान .................................................भक्तः। (मातृ / पितृ)

(ii) आरुणिः ...........................................भक्तः आसीत। (गुरु / पितृ)

(iii) व्यवहारेण ..................................जायन्ते रिपवस्थता। (मित्राणि / रिपवः)

(iv) ते निर्गुणं .............................................भवन्ति दोषाः। (अप्राप्य / प्राप्य)

(v) देहस्य ...................................................व्रतधारणं च। (शरीरं / सारं)

प्र.6 निम्नलिखितेषु प्रश्नेषु त्रयाणाम् उत्तराणि संस्कृत भाषायां एकवाक्येन लिखत – (3×2=6)

(i) भारत माता कैः वन्दिता?

(ii) देहस्य सारं किम्?

(iii) युक्तेन प्राणायामेन किं भवति?

(iv) हितोपदेशस्य रचनाकारः कः?

(v) दशरथः किमर्थं वनं गतवान्?



https://www.evidyarthi.in/

प्र.7 अधोलिखितेषु शब्देषु द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत – (2)

(i) राम तृतीया विभक्तिः

(ii) गुरु षष्ठी विभक्तिः

(iii) मति प्रथमा विभक्तिः

(iv) भवत् षष्ठी विभक्तिः

प्र.8 अधोलिखित–शब्देषु द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत – (2)

(i) अस्मद् – तृतीया विभक्तिः

(ii) रामः – षष्ठी विभक्तिः

(iii) किम् (नपुंसकलिङ्ग) – द्वितीया विभक्तिः

(iv) तत् (स्त्रीलिङ्ग) – प्रथमा विभक्तिः

[.9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृते लिखत – (2×5=10)

(क) कश्चित् एकः महान् तपस्वी ऋषिः आसीत्। (सः लोककल्याणार्थं अहर्निशं भूतले भ्रमति स्म) एकदा सः (परिभ्रमन् एकं ग्रामम् अगच्छत्) ग्रामस्य एकस्मिन् गृहे एकः शुकः पालितः आसीत्। सः शुकः ऋषिं दृष्ट्वा "मारयतु कुट्टयतु" इति वारं वारम् उच्चैः उक्तवान्। अनन्तरं सः ऋषिः अपरं स्थानम् अगच्छत् तत्रापि एकस्मिन् गृहे शुकः पालितः आसीत्। सः ऋषिं दृष्ट्वा "सीताराम–सीताराम" इति उक्तवान्। एवं शुकयोः भिन्नव्यवहारं दृष्ट्वा ऋषिः आश्चर्य–सागरे निमग्नः अभवत्।

प्रश्न –

(i) ऋषिः किमर्थं भ्रमति स्म?

(ii) प्रथमः शुकः किं वदति स्म?

(iii) अपरः शुकः किं वदति स्म?

(iv) परिभ्रमन् ऋषिः कुत्र अगच्छत्?

(v) 'भूतले' इति पदस्य विभक्तिं वचनञ्च लिखत।



https://www.evidyarthi.in/

(ख) कस्मिंश्चिन्नगरे कश्चित् स्वभाव–कृपणः विप्रः प्रतिवसति स्म। तेन भिक्षार्जितैः भुक्तशेषैः सक्तुभिः कलशः सम्पूरितः। तं च घटं नागदन्ते अवलम्ब्य तस्याधस्तात् खट्वां निधाय सततं एक दृष्ट्या तम् अवलोकयति। अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास यत् अयं घटः सक्तुभिः परिपूर्णः वर्तते। तद्यदि दुर्भिक्षं भवति तदनेन रुप्यकाणां शतमुत्पत्स्यते। ततस्तेन मया अजाद्वयं ग्रहीतव्यम्।

प्रश्न –

(i) विप्रः कुत्र प्रतिवसति स्म?

(ii) कलशः कैः सम्पूरितः?

(iii) विप्रः एकं दृष्ट्या कम् अवलोकयति?

(iv) विप्रः स्वभावेन कीदृशः आसीत्?

(v) अजाद्वयं 'ग्रहीतव्यम्' इति कः अचिन्तयत्?

(ग) उत्तरमुखे आनन्दतत्त्वस्य व्यञ्जना विद्यते। अस्मिन् भगवान् अट्टहासं कुर्वन् इव प्रतिभाति। अत्र कपोलौ उत्फुल्लौ, अधरोष्ठौ, स्फुटौ, नेत्रे निमीलिते, शिथिलाः विकीर्णाः मूर्धजाः च सुस्पष्टं दृश्यन्ते।

प्रश्न –

(i) उत्तरमुखे कपोलौ कीदृशौ?

(ii) उत्तरमुखे कस्य व्यञ्जना विद्यते?

(iii) उत्तरमुखे कौ स्फुटौ?

(iv) उत्तरमुखे शिथिलाः विकीर्णाः के?

(v) 'दृश्यते' पदे किं वचनम्?

प्र.10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत–भाषायां लिखत – (2X5=10)

(क) अन्नाद् भवन्ति भूतानि पर्जन्यादन्न सम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्म–समुद्भवः।।

प्रश्न –

(i) भूतानि कस्मात् भवन्ति?

(ii) पर्जन्यात् किं भवति?

(iii) यज्ञात् कः भवति?

(iv) अन्नात् कानि भवन्ति?

(v) 'भूतानि' इत्यस्य पदस्य विभक्तिं वचनं च लिखत।



https://www.evidyarthi.in/

(ख) गुणा. गुणज्ञेषु गुणा भवन्ति,
ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः,
समुद्रमासाद्य भवन्त्यपेयाः।।

प्रश्न –

(i) गुणाः केषु गुणा भवन्ति?
(ii) गुणाः कं प्राप्य दोषाः भवन्ति?
(iii) नद्यः कीदृशाः प्रवहन्ति?
(iv) समुद्रमासाद्य नद्यः कीदृशाः भवन्ति?
(v) 'भवन्त्पेयाः' इत्यस्मिन्पदे कः सन्धिः अस्ति?

(ग) बुद्धेः फलं तत्त्व–विचारणा च, देहस्य सारं व्रतं धारणं च। अर्थस्य सारं किल पात्रदानं, वाचः फलं प्रीतिकरं नराणाम्।

प्रश्न –

(i) बुद्धेः फलं का अस्ति?
(ii) देहस्य सारं किम् अस्ति?
(iii) वाचः फलं किम्?
(iv) 'देहस्य' पदे का विभक्तिः?
(v) कस्य सारं पात्र दानम्?

प्र.11 उचित युग्ममेलनं कुरुत – (4×1=4)

| | |
|---|---|
| (क) विष्णु शर्मा | (i) नार्जितं पुण्यं |
| (ख) तृतीये | (ii) जपार्थमुपविष्टः |
| (ग) तपस्वी गङ्गातीरे | (iii) रोगक्षयो |
| (घ) प्राणायामेन | (iv) पञ्चतन्त्रम |

प्र.12 शुद्ध वाक्यानां समक्षम् 'आम्' अशुद्ध वाक्यानां समक्षं 'न' इति लिखत। (4×1=4)
(केचित् चत्वारः)

(i) दुर्जनानां सङ्गः करणीयः।
(ii) बालः सिंह–शावकेन सह क्रीडति।
(iii) स्वकर्त्तव्यपालनं न करणीयम्।
(iv) गोपालः गीतायाः गाता।
(v) सज्जनानां सङ्गतिः करणीया।


https://www.evidyarthi.in/

प्र.13 निम्नलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृते एकपदेन लिखत – (4×1=4)

(i) प्रथमे का अर्जनीया?

(ii) श्रवणः जलार्थं कुत्र गतः?

(iii) ऋषिजनेन बालस्य नाम किं कृतम्?

(iv) आहार–समं किं नास्ति?

(v) पक्षिशावकान् भक्षितुं कः आगतः?

(vi) जातस्य ध्रुवं किम्?

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कंठस्थीकृतम् सुभाषित द्वयं लिखत। (4)

प्र.15 स्वमित्रस्य कृते पत्रं संस्कृते लिखत। (4)

**अथवा**

स्वप्राचार्यस्यकृते पञ्चदिवसानाम् अवकाशार्थं प्रार्थना–पत्रम् संस्कृते लिखत।

प्र.16 अधोलिखितेषु पञ्च अशुद्ध–कारक–वाक्यानां शुद्धिः करणीया – (5×1=5)

(i) गणेशं नमः।

(ii) मया मोदकं रोचते।

(iii) अहं विद्यालये गच्छति।

(iv) सः पाठं पठसि।

(v) आशुतोषः मित्रं सह गच्छति।

(vi) सैनिकः अश्वं पतति।

प्र.17 अधोलिखित–वाक्यानां कथानुसारं क्रम–संयोजनं कुरुत – (5×1=5)

(i) संसर्गजाः दोष गुणाः भवन्ति। 5

(ii) एवं शुकयोः भिन्न–व्यवहारं दृष्ट्वा ऋषिः आश्चर्य–सागरे निमग्नः अभवत्। ४

(iii) कश्चित् एकः महान् तपस्वी ऋषिः आसीत्। 1

(iv) सः शुकः ऋषिं दृष्ट्वा 'मारयतु–कट्टयतु' इति वारं–वारम् उच्चैः उक्तवान्। 3

(v) सः लोककल्याणार्थम् अहर्निशं भूतले भ्रमति स्म। 2



https://www.evidyarthi.in/

प्र.18 अधोलिखितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृत–भाषायां लिखत – (5×1=5)

संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम् एव। अज्ञानात् एव समाजे नानाविकाराणां जन्म भवति। हिंसाभ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीड्यन्ति तेषां मूलम् अशिक्षा एव वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तुं सज्जाः भवेम।

(i) अस्य गद्यांशस्य शीर्षकं लिखत?

(ii) दुःखानां मूलकारणं किम्?

(iii) समाजे अनेके विकाराः कस्मात् जायन्ते?

(iv) के उपद्रवाः अस्मान् पीड्यन्ति?

(v) अज्ञानस्य अन्धकारं हर्तुं वयं किं कुर्याम्?

प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – (10)

(i) मम पाठशाला

(ii) उद्यानम्

(iii) विद्या

(iv) धेनुः

---

https://www.evidyarthi.in/